HMMCW LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2021-22

## SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्चानां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 2×5 = 10

(क) जगतः पितरौ वन्दे—जगतः पितरौ कौ भवतः ? तयोः तुलना काभ्यां सह क्रियते ?

(ख) 'स ताभ्यो वलिमग्रहीत्'—स कः आसीत् ? तस्य करसंग्रहनीतिः कीदृशी च आसीत् ?

(ग) सूर्यवंशस्य प्रथमः राजा कः आसीत् ? इक्ष्वाकुः कः आसीत् ?

(घ) हेम्नः शुद्धिः श्यामिका वा केन परीक्ष्यते ?

(ङ) दिलीपस्य मन्त्रणा कीदृशी आसीत् ?

(च) राज्ञः दिलीपस्य चरित्रस्य गुणद्वयं लेख्यम्।

(छ) 'यादोरत्नैरिवार्णवः'-उद्धृतेः कोऽर्थः ?

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं समाधेयम् – 10×1 = 10

(क) पार्वत्याः तपश्चरणं संक्षेपेण विव्रियताम्।

(ख) कुमारसम्भवस्य पञ्चमसर्गस्थं भवत्पाठ्यक्रममाश्रित्य कालिदासस्य रचनाशैली लिख्यताम्।

3. अधोलिखितयोः कस्यचित् एकस्य संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 5×1 = 5

(क) तथा समक्षं दहता मनोभवॉं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

(ख) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

## SECTION-C

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं लेख्यम् – 10×1 = 10

(क) 'स सौष्ठवौदार्यविशषशालिनीं विनिश्चितार्थामिति वाचमाददे'– इदं कविवचनमनुसृत्य वनेचरोक्तिः विचार्यताम्।

(ख) 'नारिकेलफलसम्मितं वचो भारवेः'–इत्यस्य वचनस्य सार्थक्यं किरातर्जुनीयमहाकाव्यस्य प्रथमसर्गान्तर्गतं पाठ्यांशमनुसृत्य लिख्यताम्।

5. यथेच्छमेकस्य श्लोकस्य संस्कृतभाषया देवनागरीलिप्या च व्याख्या क्रियताम् – 5×1 = 5

(क) कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवुक्तमिच्छन्ति मृषा हितैषिणः॥

(ख) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकुलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥

## SECTION-D

6. अधोलिखितानां विषयाणां द्वयमधिकृत्य संस्कृतभाषया देवनागरीलिप्या च टिप्पणी रचनीया– 5×2 = 10

पवनदूतम्, गीतगोविन्दम्, भर्तृहरिः, माघः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within* 1 *hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——